श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकादशाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकादशाधिकशततमः सर्गः ॥

## मन्दोदर्या विलापो रावणशवस्य दाहश्च

तासां विलपमानानां तदा राक्षसयोषिताम्।
ज्येष्ठपत्नी प्रिया दीना भर्तारं समुदैक्षत ॥ **6.111.1** ॥

दशग्रीवं हतं दृष्ट्वा रामेणाचिन्त्यकर्मणा।
पतिं मन्दोदरी तत्र कृपणा पर्यदेवयत् ॥ **6.111.2** ॥

ननु नाम महाबाहो तव वैश्रवणानुज।
क्रुद्धस्य प्रमुखे स्थातुं त्रस्यत्यपि पुरन्दरः ॥ **6.111.3** ॥

ऋषयश्च महान्तोऽपि गन्धर्वाश्च यशस्विनः।
ननु नाम तवोद्वेगाच्चारणाश्च दिशो गताः ॥ **6.111.4** ॥

स त्वं मानुषमात्रेण रामेण युधि निर्जितः।
न व्यपत्रपसे राजन् किमिदं राक्षसेश्वर ॥ **6.111.5** ॥

कथं त्रैलोक्यमाक्रम्य श्रिया वीर्येण चान्वितम्।
अविषह्यं जघान त्वां मानुषो वनगोचरः ॥ **6.111.6** ॥

मानुषाणामविषये चरतः कामरूपिणः।
विनाशस्तव रामेण संयुगे नोपपद्यते ॥ **6.111.7** ॥

न चैतत् कर्म रामस्य श्रद्दधामि चमूमुखे।
सर्वतः समुपेतस्य तव तेनाभिमर्षणम् ॥ **6.111.8** ॥

अथवा रामरूपेण कृतान्तः स्वयमागतः।
मायां तव विनाशाय विधायाप्रतितर्किताम् ॥ **6.111.9** ॥

अथवा वासवेन त्वं धर्षितोऽसि महाबल।
वासवस्य तु का शक्तिस्त्वां द्रष्टुमपि संयुगे ॥ **6.111.10** ॥

महाबलं महावीर्यं देवशत्रुं महौजसम्।
व्यक्तमेष महायोगी परमात्मा सनातनः ॥ **6.111.11** ॥

अनादिमध्यनिधनो महतः परमो महान्।
तमसः परमो धाता शङ्खचक्रगदाधरः ॥ **6.111.12** ॥

श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः।
मानुषं रूपमास्थाय विष्णुः सत्यपराक्रमः ॥ **6.111.13** ॥

सर्वैः परिवृतो देवैर्वानरत्वमुपागतैः।
सर्वलोकेश्वरः श्रीमान् लोकानां हितकाम्यया ॥ **6.111.14** ॥

स राक्षसपरीवारं देवशत्रुं भयावहम्।
इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया ॥ **6.111.15** ॥

स्मरद्भिरिव तद् वैरमिन्द्रियैरेव निर्जितः।
यदैव हि जनस्थाने राक्षसैर्बहुभिर्वृतः ॥ **6.111.16** ॥

खरस्तु निहतो भ्राता तदा रामो न मानुषः।
यदैव नगरीं लङ्कां दुष्प्रवेशां सुरैरपि ॥ **6.111.17** ॥

प्रविष्टो हनुमान् वीर्यात् तदैव व्यथिता वयम्।
क्रियतामविरोधश्च राघवेणेति यन्मया ॥ **6.111.18** ॥

उच्यमानो न गृह्णासि तस्येयं व्युष्टिरागता।
अकस्माच्चाभिकामोऽसि सीतां राक्षसपुङ्गव ॥ **6.111.19** ॥

ऐश्वर्यस्य विनाशाय देहस्य स्वजनस्य च।
अरुन्धत्या विशिष्टां तां रोहिण्याश्चापि दुर्मते ॥ **6.111.20** ॥

सीतां धर्षयता मान्यां त्वया ह्यसदृशं कृतम्।
वसुधाया हि वसुधां श्रियाः श्रीं भर्तृवत्सलाम् ॥ **6.111.21** ॥

सीतां सर्वानवद्याङ्गीमरण्ये विजने शुभाम्।
आनयित्वा तु तां दीनां छद्मनाऽऽत्मस्वदूषणम् ॥ **6.111.22** ॥

अप्राप्य तं चैव कामं मैथिलीसङ्गमे कृतम्।
पतिव्रतायास्तपसा नूनं दग्धोऽसि मे प्रभो ॥ **6.111.23** ॥

तदैव यन्न दग्धस्त्वं धर्षयंस्तनुमध्यमाम्।
देवा बिभ्यति ते सर्वे सेन्द्राः साग्निपुरोगमाः ॥ **6.111.24** ॥

अवश्यमेव लभते फलं पापस्य कर्मणः।
भर्तः पर्यागते काले कर्ता नास्त्यत्र संशयः ॥ **6.111.25** ॥

शुभकृच्छुभमाप्नोति पापकृत् पापमश्नुते।
विभीषणः सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम् ॥ **6.111.26** ॥

सन्त्यन्याः प्रमदास्तुभ्यं रूपेणाभ्यधिकास्ततः।
अनङ्गवशमापन्नस्त्वं तु मोहान्न बुद्ध्यसे ॥ **6.111.27** ॥

न कुलेन न रूपेण न दाक्षिण्येन मैथिली।
मयाधिका वा तुल्या वा तत् तु मोहान्न बुद्ध्यसे ॥ **6.111.28** ॥

सर्वदा सर्वभूतानां नास्ति मृत्युरलक्षणः।
तव तद्वदयं मृत्युर्मैथिलीकृतलक्षणः ॥ **6.111.29** ॥

सीतानिमित्तजो मृत्युस्त्वया दूरादुपाहृतः।
मैथिली सह रामेण विशोका विहरिष्यति॥ **6.111.30** ॥

अल्पपुण्या त्वहं घोरे पतिता शोकसागरे।
कैलासे मन्दरे मेरौ तथा चैत्ररथे वने॥ **6.111.31** ॥

देवोद्यानेषु सर्वेषु विहृत्य सहिता त्वया।
विमानेनानुरूपेण या याम्यतुलया श्रिया॥ **6.111.32** ॥

पश्यन्ती विविधान् देशांस्तांस्तांश्चित्रस्रगम्बरा।
भ्रंशिता कामभोगेभ्यः सास्मि वीर वधात् तव॥ **6.111.33** ॥

सैवान्येवास्मि संवृत्ता धिग्राज्ञां चञ्चलां श्रियम्।
हा राजन् सुकुमारं ते सुभ्रु सुत्वक्समुन्नसम्॥ **6.111.34** ॥

कान्तिश्रीद्युतिभिस्तुल्यमिन्दुपद्मदिवाकरैः।
किरीटकूटोज्ज्वलितं ताम्रास्यं दीप्तकुण्डलम्॥ **6.111.35** ॥

मदव्याकुललोलाक्षं भूत्वा यत्पानभूमिषु।
विविधस्रग्धरं चारु वल्गुस्मितकथं शुभम्॥ **6.111.36** ॥

तदेवाद्य तवैवं हि वक्त्रं न भ्राजते प्रभो।
रामसायकनिर्भिन्नं रक्तं रुधिरविस्रवैः॥ **6.111.37** ॥

विशीर्णमेदोमस्तिष्कं रूक्षं स्यन्दनरेणुभिः।
हा पश्चिमा मे सम्प्राप्ता दशा वैधव्यदायिनी॥ **6.111.38** ॥

या मयाऽऽसीन्न सम्बुद्धा कदाचिदपि मन्दया।
पिता दानवराजो मे भर्ता मे राक्षसेश्वरः॥ **6.111.39** ॥

पुत्रो मे शक्रनिर्जेता इत्यहं गर्विता भृशम्।
दृप्तारिमथनाः क्रूराः प्रख्यातबलपौरुषाः॥ **6.111.40** ॥

अकुतश्चिद्भया नाथा ममेत्यासीन्मतिर्ध्रुवा।
तेषामेवम्प्रभावाणां युष्माकं राक्षसर्षभाः ॥ **6.111.41** ॥

कथं भयमसम्बुद्धं मानुषादिदमागतम्।
स्निग्धेन्द्रनीलनीलं तु प्रांशुशैलोपमं महत् ॥ **6.111.42** ॥

केयूराङ्गदवैदूर्यमुक्ताहारस्रगुज्ज्वलम्।
कान्तं विहारेष्वधिकं दीप्तं सङ्ग्रामभूमिषु ॥ **6.111.43** ॥

भात्याभरणभाभिर्यद् विद्युद्भिरिव तोयदः।
तदेवाद्य शरीरं ते तीक्ष्णैर्नैकशरैश्चितम् ॥ **6.111.44** ॥

पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते।
श्वाविधः शललैर्यद्वद् बाणैर्लग्नैर्निरन्तरम् ॥ **6.111.45** ॥

स्वर्पितैर्मर्मसु भृशं सञ्छिन्नस्नायुबन्धनम्।
क्षितौ निपतितं राजन् श्यामं वै रुधिरच्छवि ॥ **6.111.46** ॥

वज्रप्रहाराभिहतो विकीर्ण इव पर्वतः।
हा स्वप्नः सत्यमेवेदं त्वं रामेण कथं हतः ॥ **6.111.47** ॥

त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः।
त्रैलोक्यवसुभोक्तारं त्रैलोक्योद्वेगदं महत् ॥ **6.111.48** ॥

जेतारं लोकपालानां क्षेप्तारं शङ्करस्य च।
दृप्तानां निग्रहीतारमाविष्कृतपराक्रमम् ॥ **6.111.49** ॥

लोकक्षोभयितारं च साधुभूतविदारणम्।
ओजसा दृप्तवाक्यानां वक्तारं रिपुसन्निधौ ॥ **6.111.50** ॥

स्वयूथभृत्यगोप्तारं हन्तारं भीमकर्मणाम्।
हन्तारं दानवेन्द्राणां यक्षाणां च सहस्रशः ॥ **6.111.51** ॥

निवातकवचानां तु निग्रहीतारमाहवे।
नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च॥ **6.111.52**॥

धर्मव्यवस्थाभेत्तारं मायास्रष्टारमाहवे।
देवासुरनृकन्यानामाहर्तारं ततस्ततः॥ **6.111.53**॥

शत्रुस्त्रीशोकदातारं नेतारं स्वजनस्य च।
लङ्काद्वीपस्य गोप्तारं कर्तारं भीमकर्मणाम्॥ **6.111.54**॥

अस्माकं कामभोगानां दातारं रथिनां वरम्।
एवम्प्रभावं भर्तारं दृष्ट्वा रामेण पातितम्॥ **6.111.55**॥

स्थिरास्मि या देहमिमं धारयामि हतप्रिया।
शयनेषु महार्हेषु शयित्वा राक्षसेश्वर॥ **6.111.56**॥

इह कस्मात् प्रसुप्तोऽसि धरण्यां रेणुगुण्ठितः।
यदा मे तनयः शस्तो लक्ष्मणेनेन्द्रजिद् युधि॥ **6.111.57**॥

तदा त्वभिहता तीव्रमद्य त्वस्मिन् निपातिता।
साहं बन्धुजनैर्हीना हीना नाथेन च त्वया॥ **6.111.58**॥

विहीना कामभोगैश्च शोचिष्ये शाश्वतीः समाः।
प्रपन्नो दीर्घमध्वानं राजन्नद्य सुदुर्गमम्॥ **6.111.59**॥

नय मामपि दुःखार्तां न वर्तिष्ये त्वया विना।
कस्मात् त्वं मां विहायेह कृपणां गन्तुमिच्छसि॥ **6.111.60**॥

दीनां विलपतीं मन्दां किं च मां नाभिभाषसे।
दृष्ट्वा न खल्वभिक्रुद्धो मामिहानवगुण्ठिताम्॥ **6.111.61**॥

निर्गतां नगरद्वारात् पद्भ्यामेवागतां प्रभो।
पश्येष्टदार दारांस्ते भ्रष्टलज्जावगुण्ठनान्॥ **6.111.62**॥

बहिर्निष्पतितान् सर्वान् कथं दृष्ट्वा न कुप्यसि।
अयं क्रीडासहायस्तेऽनाथो लालप्यते जनः॥ **6.111.63** ॥

न चैनमाश्वासयसि किं वा न बहुमन्यसे।
यास्त्वया विधवा राजन् कृता नैकाः कुलस्त्रियः॥ **6.111.64** ॥

पतिव्रता धर्मरता गुरुशुश्रूषणे रताः।
ताभिः शोकाभितप्ताभिः शप्तः परवशं गतः॥ **6.111.65** ॥

त्वया विप्रकृताभिश्च तदा शप्तस्तदागतम्।
प्रवादः सत्यमेवायं त्वां प्रति प्रायशो नृप॥ **6.111.66** ॥

पतिव्रतानां नाकस्मात् पतन्त्यश्रूणि भूतले।
कथं च नाम ते राजन् लोकानाक्रम्य तेजसा॥ **6.111.67** ॥

नारीचौर्यमिदं क्षुद्रं कृतं शौण्डीर्यमानिना।
अपनीयाश्रमाद् रामं यन्मृगच्छद्मना त्वया॥ **6.111.68** ॥

आनीता रामपत्नी सा अपनीय च लक्ष्मणम्।
कातर्यं च न ते युद्धे कदाचित् संस्मराम्यहम्॥ **6.111.69** ॥

तत् तु भाग्यविपर्यासान्नूनं ते पक्वलक्षणम्।
अतीतानागतार्थज्ञो वर्तमानविचक्षणः॥ **6.111.70** ॥

मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निःश्वस्य चायतम्।
सत्यवाक् स महाबाहो देवरो मे यदब्रवीत्॥ **6.111.71** ॥

अयं राक्षसमुख्यानां विनाशः प्रत्युपस्थितः।
कामक्रोधसमुत्थेन व्यसनेन प्रसङ्गिना॥ **6.111.72** ॥

निवृत्तस्त्वत्कृतेनार्थः सोऽयं मूलहरो महान्।
त्वया कृतमिदं सर्वमनाथं राक्षसं कुलम्॥ **6.111.73** ॥

नहि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः।
स्त्रीस्वभावात् तु मे बुद्धिः कारुण्ये परिवर्तते॥ **6.111.74** ॥

सुकृतं दुष्कृतं च त्वं गृहीत्वा स्वां गतिं गतः।
आत्मानमनुशोचामि त्वद्विनाशेन दुःखिताम्॥ **6.111.75** ॥

सुहृदां हितकामानां न श्रुतं वचनं त्वया।
भ्रातृणां चैव कार्त्स्न्येन हितमुक्तं दशानन॥ **6.111.76** ॥

हेत्वर्थयुक्तं विधिवच्छ्रेयस्करमदारुणम्।
विभीषणेनाभिहितं न कृतं हेतुमत् त्वया॥ **6.111.77** ॥

मारीचकुम्भकर्णाभ्यां वाक्यं मम पितुस्तथा।
न कृतं वीर्यमत्तेन तस्येदं फलमीदृशम्॥ **6.111.78** ॥

नीलजीमूतसङ्काश पीताम्बर शुभाङ्गद।
स्वगात्राणि विनिक्षिप्य किं शेषे रुधिरावृतः॥ **6.111.79** ॥

प्रसुप्त इव शोकार्ता किं मां न प्रतिभाषसे।
महावीर्यस्य दक्षस्य संयुगेष्वपलायिनः॥ **6.111.80** ॥

यातुधानस्य दौहित्रीं किं मां न प्रतिभाषसे।
उत्तिष्ठोत्तिष्ठ किं शेषे नवे परिभवे कृते॥ **6.111.81** ॥

अद्य वै निर्भया लङ्कां प्रविष्टाः सूर्यरश्मयः।
येन सूदयसे शत्रून् समरे सूर्यवर्चसा॥ **6.111.82** ॥

वज्रं वज्रधरस्येव सोऽयं ते सततार्चितः।
रणे बहुप्रहरणो हेमजालपरिष्कृतः॥ **6.111.83** ॥

परिघो व्यवकीर्णस्ते बाणैश्छिन्नः सहस्रधा।
प्रियामिवोपसङ्गृह्य किं शेषे रणमेदिनीम्॥ **6.111.84** ॥

अप्रियामिव कस्माच्च मां नेच्छस्यभिभाषितुम्।
धिगस्तु हृदयं यस्या ममेदं न सहस्रधा॥ **6.111.85** ॥

त्वयि पञ्चत्वमापन्ने फलते शोकपीडितम्।
इत्येवं विलपन्ती सा बाष्पपर्याकुलेक्षणा॥ **6.111.86** ॥

स्नेहोपस्कन्नहृदया तदा मोहमुपागमत्।
कश्मलाभिहता सन्ना बभौ सा रावणोरसि॥ **6.111.87** ॥

सन्ध्यानुरक्ते जलदे दीप्ता विद्युदिवोज्ज्वला।
तथागतां समुत्थाप्य सपत्न्यस्तां भृशातुराः॥ **6.111.88** ॥

पर्यवस्थापयामासू रुदत्यो रुदतीं भृशम्।
किं ते न विदिता देवि लोकानां स्थितिरध्रुवा॥ **6.111.89** ॥

दशाविभागपर्याये राज्ञां वै चञ्चलाः श्रियः।
इत्येवमुच्यमाना सा सशब्दं प्ररुरोद ह॥ **6.111.90** ॥

स्नपयन्ती तदास्रेण स्तनौ वक्त्रं सुनिर्मलम्।
एतस्मिन्नन्तरे रामो विभीषणमुवाच ह॥ **6.111.91** ॥

संस्कारः क्रियतां भ्रातुः स्त्रीगणः परिसान्त्व्यताम्।
तमुवाच ततो धीमान् विभीषण इदं वचः॥ **6.111.92** ॥

विमृश्य बुद्ध्या प्रश्रितं धर्मार्थसहितं हितम्।
त्यक्तधर्मव्रतं क्रूरं नृशंसमनृतं तथा॥ **6.111.93** ॥

नाहमर्हामि संस्कर्तुं परदाराभिमर्शनम्।
भ्रातृरूपो हि मे शत्रुरेष सर्वाहिते रतः॥ **6.111.94** ॥

रावणो नार्हते पूजां पूज्योऽपि गुरुगौरवात्।
नृशंस इति मां राम वक्ष्यन्ति मनुजा भुवि॥ **6.111.95** ॥

श्रुत्वा तस्यागुणान् सर्वे वक्ष्यन्ति सुकृतं पुनः।
तच्छ्रुत्वा परमप्रीतो रामो धर्मभृतां वरः॥ **6.111.96** ॥

विभीषणमुवाचेदं वाक्यज्ञं वाक्यकोविदः।
तवापि मे प्रियं कार्यं त्वत्प्रभावान्मया जितम्॥ **6.111.97** ॥

अवश्यं तु क्षमं वाच्यो मया त्वं राक्षसेश्वर।
अधर्मानृतसंयुक्तः कामं त्वेष निशाचरः॥ **6.111.98** ॥

तेजस्वी बलवाञ्छूरः सङ्ग्रामेषु च नित्यशः।
शतक्रतुमुखैर्देवैः श्रूयते न पराजितः॥ **6.111.99** ॥

महात्मा बलसम्पन्नो रावणो लोकरावणः।
मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम्॥ **6.111.100** ॥

क्रियतामस्य संस्कारो ममाप्येष यथा तव।
त्वत्सकाशान्महाबाहो संस्कारं विधिपूर्वकम्॥ **6.111.101** ॥

क्षिप्रमर्हति धर्मेण त्वं यशोभाग् भविष्यसि।
राघवस्य वचः श्रुत्वा त्वरमाणो विभीषणः॥ **6.111.102** ॥

संस्कारयितुमारेभे भ्रातरं रावणं हतम्।
स प्रविश्य पुरीं लङ्कां राक्षसेन्द्रो विभीषणः॥ **6.111.103** ॥

रावणस्याग्निहोत्रं तु निर्यापयति सत्वरम्।
शकटान् दारुरूपाणि अग्नीन् वै याजकांस्तथा॥ **6.111.104** ॥

तथा चन्दनकाष्ठानि काष्ठानि विविधानि च।
अगरूणि सुगन्धीनि गन्धांश्च सुरभींस्तथा॥ **6.111.105** ॥

मणिमुक्ताप्रवालानि निर्यापयति राक्षसः।
आजगाम मुहूर्तेन राक्षसैः परिवारितः॥ **6.111.106** ॥

ततो माल्यवता सार्धं क्रियामेव चकार सः।
सौवर्णीं शिबिकां दिव्यामारोप्य क्षौमवाससम्॥ **6.111.107** ॥

रावणं राक्षसाधीशमश्रुवर्णमुखा द्विजाः।
तूर्यघोषैश्च विविधैः स्तुवद्भिश्चाभिनन्दितम्॥ **6.111.108** ॥

पताकाभिश्च चित्राभिः सुमनोभिश्च चित्रिताम्।
उत्क्षिप्य शिबिकां तां तु विभीषणपुरोगमाः॥ **6.111.109** ॥

दक्षिणाभिमुखाः सर्वे गृह्य काष्ठानि भेजिरे।
अग्नयो दीप्यमानास्ते तदाध्वर्युसमीरिताः॥ **6.111.110** ॥

शरणाभिगताः सर्वे पुरस्तात् तस्य ते ययुः।
अन्तःपुराणि सर्वाणि रुदमानानि सत्वरम्॥ **6.111.111** ॥

पृष्ठतोऽनुययुस्तानि प्लवमानानि सर्वतः।
रावणं प्रयते देशे स्थाप्य ते भृशदुःखिताः॥ **6.111.112** ॥

चितां चन्दनकाष्ठैश्च पद्मकोशीरचन्दनैः।
ब्राह्म्या संवर्तयामासू राङ्कवास्तरणावृताम्॥ **6.111.113** ॥

प्रचक्रू राक्षसेन्द्रस्य पितृमेधमनुत्तमम्।
वेदिं च दक्षिणाप्राचीं यथास्थानं च पावकम्॥ **6.111.114** ॥

पृषदाज्येन सम्पूर्णं स्रुवं स्कन्धे प्रचिक्षिपुः।
पादयोः शकटं प्रापुरूर्वोश्चोलूखलं तदा॥ **6.111.115** ॥

दारुपात्राणि सर्वाणि अरणिं चोत्तरारणिम्।
दत्त्वा तु मुसलं चान्यं यथास्थानं विचक्रमुः॥ **6.111.116** ॥

शास्त्रदृष्टेन विधिना महर्षिविहितेन च।
तत्र मेध्यं पशुं हत्वा राक्षसेन्द्रस्य राक्षसाः॥ **6.111.117** ॥

परिस्तरणिकां राज्ञो घृताक्तां समवेशयन्।
गन्धैर्माल्यैरलङ्कृत्य रावणं दीनमानसाः॥ **6.111.118** ॥

विभीषणसहायास्ते वस्त्रैश्च विविधैरपि।
लाजैरवकिरन्ति स्म बाष्पपूर्णमुखास्तथा॥ **6.111.119** ॥

स ददौ पावकं तस्य विधियुक्तं विभीषणः।
स्नात्वा चैवार्द्रवस्त्रेण तिलान् दर्भविमिश्रितान्॥ **6.111.120** ॥

उदकेन च सम्मिश्रान् प्रदाय विधिपूर्वकम्।
ताः स्त्रियोऽनुनयामास सान्त्वयित्वा पुनः पुनः॥ **6.111.121** ॥

गम्यतामिति ताः सर्वा विविशुर्नगरं ततः।
प्रविष्टासु पुरीं स्त्रीषु राक्षसेन्द्रो विभीषणः।
रामपार्श्वमुपागम्य समतिष्ठद् विनीतवत्॥ **6.111.122** ॥

रामोऽपि सह सैन्येन ससुग्रीवः सलक्ष्मणः।
हर्षं लेभे रिपुं हत्वा वृत्रं वज्रधरो यथा॥ **6.111.123** ॥

ततो विमुक्त्वा सशरं शरासनं
  महेन्द्रदत्तं कवचं स तन्महत्।
विमुच्य रोषं रिपुनिग्रहात् ततो
  रामः स सौम्यत्वमुपागतोऽरिहा॥ **6.111.124** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
एकादशाधिकशततमः सर्गः॥